ज्येष्ठभगिन्यां स्त्री। वर्णेषु मध्ये अग्रजातत्वात् विप्रे। [स०। जङ्घाग्रभागे।

**अग्रजङ्घा** स्त्री अग्रा जङ्घा अवयवावयविनोरभेदात् क०

**अग्रजन्मन्** पु० अग्रे जन्म यस्य जन-मनिन् व्यधि० बहु०। ज्येष्ठभ्रातरि, विप्रे च। अग्रजातमात्रे त्रि०। अग्रात् प्रधानाङ्गात् मुखात् जन्मास्य व्य०ब०। ब्रह्मणोमुखोत्पन्ने विप्रे, तस्य तन्मुखोत्पत्तिश्च ताण्ड्यमहाब्राह्मणे उक्ता यथा "सोऽकामयत यज्ञं सृजेयेति स मुखत एव त्रिवृतमसृजत तं गायत्रीच्छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणोमनुष्यो वसन्त ऋतुस्तस्मात्त्रिवृत् स्तोमानां मुखं, गायत्री च्छन्दसाम्, अग्निर्देवतानां, ब्राह्मणो मनुष्याणां, वसन्त ऋतूनां, तस्माद्ब्राह्मणो मुखेन वीर्य्यङ्करोति मुखतो हि सृष्टः" इति। व्याख्यातञ्चैतत् भाष्ये "सः प्रजापतिरकामयत् किमिति"? सर्व्वसाधकं यज्ञं सृजेयेति स एतमग्निष्टोममपश्यत् तमाहरदित्युक्तस्यैवेदं विवरणं सः प्रजापतिः मुखत आत्मनो मुखादेव त्रिवृतमाख्यत्त्रित्वयसाध्यमेतन्नामकं स्तोममसृजत तं त्रिवृतमनु पश्चाद्गायत्रीछन्दः गायत्रं नाम छन्दोऽसृज्यत तदनु अग्निर्देवताऽसृज्यत तमनु मनुष्यो ब्राह्मणोऽसृज्यत तथा तमनु वसन्ताख्यश्च ऋतुरसृज्यत यस्माद्यदेते मुखतएव सृष्टाः तस्मादेते त्रिवृदादयः स्वस्वजातीयानां मध्ये मुख्या अभवन् त्रिवृदादीनां मुख्यानां मध्ये ब्राह्मणस्य मुख्यत्वप्रयुक्तं वीर्य्यं लोकसिद्धं दर्शयति तस्मान्मुखसृष्टत्वेन मुख्यत्वात् ब्राह्मणो मुखेनेदानीमपि वीर्य्यं स्वाध्यायप्रवचनादिजन्यं सामर्थ्यङ्करोति तस्मादित्युक्तं विवृणोति हि यस्माद्ब्राह्मणो मुखतः सृष्टस्तस्मादित्यर्थः॥एवमुक्तमर्थं यो वेद सोऽपि मुखेन वीर्य्यङ्करोति मुखसाध्येन स्वाध्यायप्रवचनादिनैवाभीष्टं साधयति इत्यर्थः"इति। "ब्राह्मणोऽस्य मुखमासीति" पुरुषसूक्तम् अत एव विप्रस्य मुखजातत्वेन मुखसाध्यस्वाध्यायाभ्यसने एव वीर्य्यं भवतीत्यप्युक्तम् अतएव मनुना "वेदमेव सदाभ्यसे" दित्युक्तम् हारीतसंहितायां तु "षट् कर्म्माणि, निजान्याहुर्ब्राह्मणस्य महात्मनः। तैरेव सततं यस्तु वर्त्तयेत् सुखमेधते अध्यापनं चाध्ययनं याजनं यजनं तथा। दानं प्रतिग्रहश्चेति षट् कर्म्माणीति चोच्यते" इति "वेदञ्चैव सदाभ्यसेत् शुचौ देशे समाहितः धर्म्मशास्त्रं तथा पाठ्यं ब्राह्मणैः शुद्धमानसैः वेदवत् पठितव्यञ्च श्रोतव्यञ्च दिवानिशि स्मृतिहीनाय विप्राय स्मृतिहीने तथैव च दानं भोजनमन्यच्च दत्तं कुलविनाशनम्। तस्मात् सर्वप्रयत्नेन वेदशास्त्रं पठेत्,, द्विज इति" च। "सत्त्वप्रधाना वप्राः स्युरिति भारतोक्तेः विप्रस्य सत्वप्रधानतया "ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप!। कर्म्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः। शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजमिति" गीतायां सात्विकधर्म्माएवास्य स्वाभाविका इत्युक्तम्। विवृतञ्चैतत् श्रीधर स्वामिना "तत्र ब्राह्मणस्य स्वाभाविकानि कर्म्माण्याह शम इति, शमश्चित्तोपरमः (वाह्यविषयान्निवर्त्तनम्) दमोवाह्येन्द्रियोपरमः (स्वस्वविषयान्निवर्त्तनम्) तपः पूर्व्वोक्तं (सगुणब्रह्मोपासनादि) शौचं वाह्यमाभ्यन्तरञ्च। क्षान्तिः (शीतोष्णादिद्वन्द्वसहिष्णुता) आर्जवम् अवक्रता (वाह्याभ्यन्तरयोः कापट्याभावः) ज्ञानं शास्त्रीयं विज्ञानमनुभवः आस्तिक्यम् अस्ति परलोक इति निश्चयः। एतत् शमादि ब्राह्मणस्य स्वभावात् जातं कर्म्मेति"। "मुखजातादयोप्यत्र अग्रे प्रथमं जन्म यस्य। चतुर्मुखे ब्रह्मणि, "यो वै ब्रह्माणं विदधाति पूर्वं यश्चास्मै प्रहिणोति वेदमिति" "हिरण्यगर्भः समवर्त्ततागे" इति च श्रुतौ परब्रह्मसकाशात् तस्य प्रथमोत्पत्तिरुक्ता, तदुत्पत्तिप्रकारस्तु मनुना "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्बहुधा प्रजाः। अप एव ससर्जादौ तासु वीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह" इत्यनेनोक्तः।

**अग्रजात** पु० अग्रे जातः जन—क्त ७त०। ज्येष्ठभ्रातरि, विप्रे च। ज्येष्ठभगिन्यां स्त्री। पूर्व्वजातमात्रे त्रि०।

**अग्रजाति** पु० अग्रा श्रेष्ठा जातिर्यस्य, जन-क्तिन् कर्म०। विप्रे।

**अग्रजिह्वा** स्त्री अग्रा जिह्वा अग्रहस्तवत् क०। जिह्वाग्रभागे।

**अग्रणी** त्रि० अग्रे नीयतेऽसौ णी—क्विप् ७त० णत्वम्। प्रभौ श्रेष्ठे च। अग्रं नयति देवेभ्य इति। वह्नौ पु० यथाचास्याग्रणीत्वं तथाग्निशब्दे निरुक्तव्याख्यायामुक्तम्।

**अग्रतस्** अव्य० अग्रे अग्राद्वा अग्र+तसिल्। पूर्व्ववृत्तौ, पूर्व्वभागावधिके च। [अग्रगामिनि। स्त्रियां ङीप्।

**अग्रतःसर** त्रि० अग्रतः सरति गच्छति सृ—ट ७त०।

**अग्रदानिन्** पु० अग्रे दानं उद्देश्यत्वेनास्त्यस्य अग्रदान+इनि प्रेतोद्देशेन यद्दानं दीयते तत्प्रतिग्राहिणि "अग्रदानीति" ख्याते विप्रे। "लोभी विप्रस्य शूद्राणामग्रे दानं गृहीतवान्। ग्रहणात्तिलदानानामग्रदानो बभूव स" इति पुरा०।

**अग्रदानीय** पु० अग्रे दानमर्हति छ। अग्रदानिविप्रे।

**अग्रनख** पु० अग्रो नखः अग्रहस्तवत् क०। नखाग्रे।